न्यायशास्त्रे काश्मीरस्य योगदानम्

के.डि. शोभा

अथ षट्दर्शनालङ्कारभूतस्य न्यायदर्शनस्य विकासपरिणामे काश्मीरस्य योगदानम् अतिमहत्तरमेव। श्री गौतममुनिना (५५०बि.सि) विरचितसूत्रेण आरब्धं न्यायसाहित्यं काश्मीरदेशीयैरपि नैयायिकैः अत्यन्तं प्रोज्वलितं चकार। प्राचीनकालादेव काश्मीरदेशः संस्कृतविद्याकेन्द्रत्वेन प्रसिद्धः आसीत्।

अनादिकालादपि कश्यपस्य कृपैव या भाति हिमालये।

गैर्वाणवाणी कवितामयी सा काश्मीरभूमिर्जयति प्रशस्ता।।

संस्कृतभाषायाः एवं साहित्यस्य च दत्तप्राधान्येन देशोऽयं शारदापीठम् इत्यादि नाम्नाऽपि प्रकीर्तितः अस्ति।

यत्र स्त्रीणामपि किमपरं जन्मभाषावदेव

प्रत्यावासं विलसति वचः संस्कृतं प्राकृतं च।।

काश्मीरदेशे साधारणनारीणामपि संस्कृतपरिज्ञानं आसीदित्येतत् तत्र संस्कृतभाषायाः प्राधान्यं प्रचारञ्च स्पष्टीयते। शैवप्रत्यभिज्ञा सिद्धान्तस्य प्रभवस्थानमपि काश्मीरमेव। अत्यन्तरमणीयात्मकेन द्राक्षाकुङ्कुमकेसरिणा मनोरञ्जकेन प्रकृतिसौन्दर्येण च सम्पन्नः काश्मीरदेशः विहारिणां आकर्षणकेन्द्रं यथा आसीत् तथा विभिन्न वैज्ञानिक पारम्पर्येण पण्डितानां श्रद्धाकेन्द्रमप्यासीत्। अस्मिन् देशे अनेके न्यायशास्त्रविद्वांसाः न्यायसाहित्यस्य विकासाय संरक्षणाय च नितान्तं श्रद्धामकुर्वन्।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।

आश्रयः सर्वधर्माणां शश्वतान्वीक्षिकी मता।।

इति न्यायशास्त्रं सर्वशास्त्राणां प्रदीपमेव, तस्मिन् विषये मतभेदो नास्ति। तादृशन्यायशास्त्रं चतुर्दशविद्यासु अन्यतमत्वेन प्रकीर्तितम् आसन्।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।

पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दशः।।

अस्य जन्मदाता महर्षिः गौतम एव। न्यायसूत्रोपरि वात्स्यायनकृतभाष्यं (४००ए.डि), उद्योतकरविरचितवार्तिकं (६३५ए.डि), वाचस्पतिमिश्रप्रणीत (८४१ ए.डि) वार्तिक तात्पर्यटीका, उदयनाचार्यकृत (९५४ ए.डि) वार्तिकतात्पर्यटीकापरिशुद्धिश्च सूत्रावलम्बेन विरचितग्रन्थाः आसन्। पूर्वोक्तेषु न्यायपण्डितेषु उद्योतकरं विहाय अन्ये सर्वे आचार्याः मिथिलदेशीयाः एवेति पण्डितानां मतम्। अनेन च मिथिलातः एव न्यायसाहित्यस्य प्रारम्भो अभूत् इति अवधार्यते। तथाऽपि अतिबृहत्तमस्य एवं महत्तरस्य च न्यायसाहित्यस्य कृते काश्मीरस्य योगदानं सर्वदा अविस्मरणीयमेव।

उद्योतकरः -भारद्वाजः

उद्योतकराचार्यः अतीव प्रतिभाशालि, मेधावी, कुशाग्रबुद्धिः, न्यायशिरोमणी च आसीत्। न्यायशास्त्रविरोधिनः दिङ्नागस्य मतान् खण्डयितुं न्यायशास्त्रस्य निर्दुष्टतां मण्डयितुं च न्यायवार्तिकाख्यम् अत्युत्कृष्टं ग्रन्थमारचयत्। दिङ्नागादीनां नास्तिकानां प्रबलाक्रमणैः प्रायः अस्ततेजसः न्यायसाहित्यस्य पुनरप्युद्योतकरत्वात् उद्योतकर इति तस्य नामोऽप्यन्वर्थीकृतम्। अस्य पण्डितश्रेष्ठस्य जन्मदेशविषये आचार्याणां मतभेदाः सन्ति। सः मालवदेशान्तर्गतपद्मावतीप्रदेशवासि आसीत् इति केचित् वदन्ति। अन्ये केचित् सः काश्मीरदेशीयः इत्युक्त्वा वादोऽयं एवं समर्थ्यते च।

वार्तिककारः स्वकीयग्रन्थे एवं लिखितवान् - 'पाशुपताचार्य उद्योतकरविरचितं न्यायसूत्रवार्तिकं समाप्तम् इति'। अनेन च सुस्पष्टमिदं विज्ञायते यत् न्यायवार्तिककारो

अवश्यमेव काश्मीरदेशवासी आसीत्। कुतः इति चेत् काश्मीरे एव तन्त्रविद्या एवं तन्त्रविद्याप्रयुक्ता सर्वेपि संप्रयोगाः तथा तान्त्रिकसम्बन्धिता पाशुपतप्रभृतयो नानाविधाः सम्प्रदायाः समुपलब्धा एवं प्रचलिताः च। पाशुपताचार्य इति स्वयमेव प्रकीर्तितस्य तस्य काश्मीरदेशीयत्वे संशयस्य अवकाशो नास्ति इति तेषां आशयः। । तस्य न्यायवार्तिकाख्ये ग्रन्थे बौद्धमतानां निरासः एव प्राधान्येन क्रियते। वार्तिकारम्भे दिङ्नागं कुतार्किक इति आख्यातवान्। वार्तिकस्य रचनायाः प्रयोजनं वार्तिकारम्भे एव इत्थं निर्दिश्यते च।

यदक्षपादप्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद।

कुतार्किकज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः।।इति।

अत्र कुतार्किक इत्यनेन दिङ्नागप्रभृतयो बौद्धाचार्याः एव निर्दिष्टाः। एवं न्यायतात्पर्यटीकायाः आरम्भे सर्वतन्त्रस्वतन्त्रः श्री वाचस्पतिमिश्रः- अथ भगवताऽक्षपादेन निःश्रेयसहेतो शास्त्रे प्रणीते व्युत्पादिते च भगवता श्री पक्षिलस्वामिना किमपरमवशिष्यते तदर्थं वार्तिकारम्भ इति शङ्कां निराचिकीर्षुः सूत्रकारोक्तप्रयोजनानुवादकं वार्तिकारम्भ प्रयोजनं तत्र निर्दिश्यते च।

जयन्तभट्टः-

काश्मीरदेशीयेषु नैयायिकेषु प्रमुखो भवति श्री जयन्तभट्टः। गङ्गेशप्रभृतयो महान्तो विद्वांसः तं जरनैयायिकः इत्याख्यायते। सः चार्वाकबौद्धार्हतमीमांसादिदर्शनानां खण्डनम् अत्यन्तं सुस्पष्टभाषायां कृतवान्, एवं नास्तिकैः सह सहयोगः पापमिति गण्यते च। जयन्तभट्टः काव्ये नाटके साहित्ये च निपुणः आसीत्। आगमडम्बर नाम नाटकमपि तेन विरचितम्। तस्य पुत्रः अभिनन्दः स्वकीयकादम्बरीकथासारे एवं लिखति -

अवतारसन्निष्यन्दमनोभिव्यक्तसौरभम्।

न्यायस्य कलिकामात्रं जयन्तः पर्यदीदृशात्।।

जयन्तभट्टः काश्मीरवृत्तिकार इत्यनेनापि विख्यातः। प्रायेण नवमशताब्द्याः उत्तरार्ध एव तस्य कालः इति पुत्रेण अभिनन्देन सूचितः। जयन्तभट्टः गौडदेशीयत्वेन गौडब्राह्मणः भारद्वाजगोत्रोत्पन्नश्चासीत्। एवं सः महादेवस्य (शिवस्य) परमभक्तश्चासीत्। तस्य पूर्वजाः जनाः बङ्गदेशवासिनः एवेति श्रूयन्ते। तस्य पितामहः श्रीशक्तिस्वामि बङ्गदेशतः काश्मीरदेशामागत्य तत्र अधिवसतिस्म। तस्य पितुर्नाम चन्द्रप्रकाशः इत्यासीत्। जयन्तभट्टेन चार्वाकबौद्धदार्शनिकसिद्धान्तानां खण्डनं सम्यक् कृतवान्। स्वकीयसिद्धान्तश्च वैदुष्यपूर्णदृष्ट्या स्थापितवान्। तस्य न्यायमञ्जर्यां गौतमसूत्राणां सर्वेषां व्याख्यानं न क्रियते, किन्तु कतिपयसूत्राणामुपर्येव वृत्तिः कृता। न्यायमञ्जरिं विद्वद्भिः एवं प्रशंस्यते -

न्यायौषधिवनेभ्योऽयमाहृतः परमोरसः।

इदमान्वीक्षिकीक्षीरान्नवनीतविमोद्धृतम्।।

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमः।

वचो विन्यासवैचित्र्यमात्रमत्र विचार्यते।।

तैरेव कुसुमैर्पूर्वमसकृत्कृतशेखराः।

अपूर्वरचने दाम्नि दधत्येव कुतूहलम्।।

चार्वाकस्य स्वभाववादे आक्षेपः एवं प्रकटितः - यथा

भो भगवन्तः सभ्याः क्वेदं दृष्टं क्वा वा श्रुतं लोके।

यद्वाक्येषु पदानां रचना नैसर्गिकी भवति।।

यदि स्वाभाविकी वेदे पदानां रचना भवेत्।

पटे हि हन्त तन्तूना कथं नैसर्गिकी न सा।।

पटादिरचनां दृष्ट्वा तस्य चेत् सानुमीयते।

वेदेऽपि रचनां दृष्ट्वा कर्तृत्वं तस्य गम्यताम्।।

एवं वेदस्य पौरुषेयत्वं साधनार्थं मीमांसक अपौरुषेयत्व निषेधार्थं च एवं उच्यते।

पुंसामसर्ववित्वं हि रागादिमलप्रबन्धनम्।

न च रागादिभिः स्पृष्टो भगवानिति सर्ववित्।।

इष्टानिष्टार्थसम्भोगप्रभवाः खलु देहिनाम्।

रागादय कथन्ते स्युर्नित्यानन्दात्मके ।।

मीमांसकाः यशः पिबन्तु पयो वा पिबन्तु बुद्धिजाड्यापनयनाय ब्राह्मी घृतं वा पिबन्तु, वेदस्तु पुरुषप्रणीत एव नात्र भ्रान्तिः इति।

जयन्तभट्टस्य आगमडम्बरनामकनाटकः अत्युत्कृष्टनाट्यग्रन्थमेवेति पुत्रेण अभिनन्देन इत्थं प्रशंस्यते।

सरसः सदलंकाराः प्रसादमधुरागिरः।

कान्ताः तातजयन्तस्य जयन्ति जगतां गुरोः।

गङ्गशोपाध्यायः तमेवं नमस्क्रियते यथा -

अज्ञानतिमिरशमनीं परदमनीं न्यायमञ्जरी रुचिराम्।

प्रसवित्रे प्रसवित्रे विद्यातरवे गुरवे नमः।।

न्यायमञ्जरीं विहाय न्यायकलिका तथा न्यायपल्लवा नामकग्रन्थद्वयं तेन विरचितम् । न्यायकलिका न्यायसारस्य व्याख्यानमेवेति पण्डिताः आभिप्रयन्ति स्म। किन्तु एतत् न्यायसारस्य व्याख्यानमेव न स्यात् इति गङ्गानाथ झा महोदयेन साधितमासीत्। एवं न्यायमञ्जरी न्यायकलिका न्यायपल्लव इति न्यायसम्बन्धिना कृतित्रयेण तथा आगमडम्बर

नामक नाट्यग्रन्थेन च अयं आचार्यः वैज्ञानिकलोके सदा विलसन्ति।

भासर्वज्ञः -

न्यायशास्त्रेतिहासे आचार्यः भासर्वज्ञः समुन्नतं पदमलङ्करोति। सः काश्मीरदेशीयः एवेति पण्डिताः एककण्ठेन अभिप्रयन्ति स्म। भासर्वज्ञस्य माहात्म्ये अनेककारणानि सन्ति। प्रथमं तावत् सः प्रथमप्रकरणग्रन्थस्य कर्ता एव। एवं न्यायशास्त्रपारम्पर्यस्य पुनः स्थापने सः कारणीभूतो अभवत्। न्यायशास्त्रेतिहासः श्री गौतममुनिना विरचित सूत्रेणैव आरभ्यते। न्यायदर्शने गौतममुनिना प्रमाणादिषोडशपदार्थानां उद्देशलक्षणपरीक्षादयः क्रियते। षोडशपदार्थाः प्रमाण प्रमेय संशय प्रयोजन दृष्टान्त सिद्धान्तावयव तर्कनिर्णयवादजल्पवितण्ड हेत्वाभास छल जाति निग्रहस्थानानि। एतेषां पदार्थानां तत्वज्ञानात् आत्यन्तिकदुःखनिवृत्तिरूपमोक्षप्राप्तिरिति न्यायसिद्धान्तः। किन्तु प्रौद्धजैनदार्शनीकाः दिङ्नागः (५०० ए.डि) सिद्धसेनदिवाकरश्च(५३३ ए.डि) गौतमोक्तपदार्थेषु प्रमाणनामक प्रथमपदार्थस्य प्रतिपादनेव क्रियते। एवं गौतमेन लघुरूपेण प्रतिपादितस्य अनुमाननिरूपणं अतिविस्तरेण क्रियते च। मोक्षप्रयोजकत्वेन प्रतिपादित प्रमेयनिरूपणे निष्प्रयोजनता प्रकाश्यते च। एवं प्रमेय प्राधान्य प्राचीन न्यायशास्त्रस्य स्वरूपमेव परिवर्तयति स्म। यदि वात्स्यायन उद्योतकरादि आचार्याः प्राचीनन्यायस्य सिद्धान्तस्य पुनस्थापने नास्तिकदर्शन निराकरणे अत्यन्तं परिश्रमते। तथाऽपि पञ्चशताप्रद्वारभ्य (५०० ए. डि) द्वादशशताब्दिपर्यन्तं (५००-१२०० ए.डि) दार्शनिकलोके प्रतिवादिरूपेण प्रौद्धजैन दर्शनानां प्रौढ्या, प्राचीन न्यायशास्त्रं कदाचित् कान्तिरहिता जाता। तादृश अनुचित साहचर्ये न्यायशास्त्रस्य पुनःस्थापने प्राचीन प्रौढ्यां पुनरवाप्तये च प्रवृत्तमानेषु आचार्येषु प्रमुखो भवति भासर्वज्ञः। सः षोडशपदार्थप्रतिपादक प्राचीनशैलीं परित्यज्य प्रमाण नामक एकसैव पदार्थनिरूपणे श्रद्धामकुर्वन्। तदर्थं सः प्रकरणो नाम नूतनग्रन्थरचना पद्धतिः आविष्कृतवान्। प्रकरणम् एवं निरूपिते -

शास्त्रैकदेश सम्बद्धं शास्त्रकार्यान्तरेस्थितम्।

आहुः प्रकरणं नाम ग्रन्थभेदं विपक्षितः।।

सेयं ग्रन्थरचना रीतिः पश्चात्कालीनाः अनेकाः पण्डिताः स्वीकृताः। एवं तर्कसंङ्ग्रह मुक्तावली तर्कभाषा तार्किकरक्षा इत्यादि प्रौढग्रन्थाः न्यायशास्त्रलोके अमूल्यरत्न इव शोभते। भासर्वज्ञेन प्राचीन न्यायस्य अनेकतत्वानि परिष्कृता परित्यक्ता वा तत्र प्रधानं भवति प्रमाणत्रयवादः। भासर्वज्ञश्च सांख्यश्च त्रितयं इत्येतत् सर्वदा अनुस्मरणीयमेव। गौतमोक्तप्रमाणेतरपदार्थाः सः अनुमानप्रमाणनिरूपणे अन्तर्भूताश्च। एवं प्राचीनन्यायस्य आत्यन्तिकदुःखनिवृत्तिः मोक्षः इत्येतत् निराकृत्य परमानन्दरूपो मोक्षः स्वीक्रियते। भार्वज्ञेन चत्वारि गन्थाः विरचिताः। न्यायसारः, न्यायभूषणम्, गणकारिका,नित्यज्ञानविनिश्चयश्चेति। तेषु न्यायसारः प्रथमप्रकरणग्रन्थः भवति। अस्मिन् ग्रन्थोपरि आष्टादश व्याख्यानानि ह्रस्वकालादेव अजायत इत्येतत् ग्रन्थस्यास्य माहात्म्यं प्रकाश्यते। न्यायभूषणं न्यायसारस्य स्वोपज्ञं व्याख्यानमेव। गणकारिका एकः पाशुपतग्रन्थः भवति। तत्र श्लोकरूपेण पाशुपतसिद्धान्तानुपवर्ण्यते। नित्यज्ञानविनिश्चयः आत्मनः नित्यत्वप्रतिपादनग्रन्थो भवति, किन्तु तन्नोपलभ्यते।

आभिनन्दः -

न्यायमञ्जरीकारस्य जयन्तभट्टस्य पुत्रः अभिनन्दः न्यायशास्त्रे अतीवपण्डितः आसीत्। श्रीकण्ठचरितस्य पञ्चविंशति तमे सर्गे मंखकेन अभिनन्दस्योल्लेखः कृतः। मंखकस्य काले त्रिदश विद्वांसानां एकः सभा आसीत्। तस्मिन् सभायां अभिनन्दः न्यायपण्डितः आसीत्। न्यायशास्त्रे अभिनन्दस्य अतिविशिष्टं ज्ञानमासीत्।

तात्पर्याचार्यः

भासर्वज्ञस्य मार्गानुसारिणाम् आचार्येषु मध्ये प्रमुखो भवति तात्पर्याचार्यः। सोऽपि काश्मीरदेशीयः भवति। वल्लभाचार्यः न्यायलीलावत्याम् एवं लिखितवान् -

तदीयमनाम्नातता भासर्वज्ञस्य यदाचार्यमप्यवमन्यते।

तदनुयायिनस्तात्पर्याचार्यस्य सिंहनादः सविदेव हि भगवती।।

उदयनाचार्यः तस्य आत्मतत्त्वविवेके प्रामाण्यवादस्य निरूपणावसरे तात्पर्याचार्यस्य मतानि उल्लिखितानि। म.म विन्ध्येश्वरीप्रसादद्विवेदि तथा चन्द्रकान्ततर्कालङ्कारश्च तं वचस्पतिमिश्रेति व्यवहियते। किन्तु अस्य निराकरणं उदयानाचार्येण प्रबोधसिद्ध्यां वल्लभाचार्येण न्यायलीलावत्यां एवं च वाचस्पतिमिश्रेण खण्डनोद्धारणे च तात्पर्यचार्यस्य मतोल्लेखः कृता इत्यनेन वाचोऽयं निरुद्ध्यते।

वासुदेवसूरिः -

भासर्वज्ञविरचितस्य न्यायसारस्य व्याख्यानं कृत्तवन्तः श्री वासुदेवसूरिरपि काश्मीरदेशीयः एव। तस्य न्यायसारोपरि विरचिता न्यायसारपदपञ्चिका व्याख्या न्यायसारतत्वावगमे अत्यन्तमुपयुज्यते। न्यायभूषणोपरि न्यायभूषणभूषणमिति अन्येपि कश्चन व्याख्यापि तेन विरचिता इति केचित् वदन्ति। किन्तु ग्रन्थोऽयं इदानीमपि अनुपलब्धा एव। वासुदेवसूरिणः देशविषये अन्ये कश्चन वादाः सन्ति। तस्य पूर्वजाः काश्मीरदेशात् आगत्य केरलदेशे कोट्टयसमीपवर्ति कुमारनल्लूर् देशे आगत्य तत्र अधिवसेत्, अतः सः केरलीयः इति । किन्तु विषयेऽस्मिन् अनुकूलप्रमाणं न उपलभ्यते। अतः सः काश्मीरदेशीयः एवेति अङ्गीक्रियतामिति।

वित्तोकः -

रत्नकीर्त्या वित्तोकनामक एक न्यायशास्त्रपण्डितं उल्लिखिताः आसन्। सः काश्मीरदेशीयः एवेति म.म.डा.उमेशमिश्रस्य अभिप्रायः। वाचस्पतिमिश्रेण वित्तोकमतं खण्डितः अतः तस्य कालः वाचस्पतिमिश्रानन्तरमेवेति सामान्येन परिकल्पितमासीत्। एवं द्वाविंशति शताब्द्यामपि अनेकाः नैयायिकाः न्यायसाहित्यस्य अभिवृद्धये प्रवृत्ताः तेषु केचन मुख्याः आचार्या अधो निर्दिश्यते।

आरूढभानुशास्त्री

जम्मुकाश्मीरे पल्सी ग्रामे श्रीत्रिलोचनदत्तस्य पुत्रः आरूढभानु शास्त्री १९३२ तमे वर्षे जनिमलभत। तेन श्री गुलाभसिंहद्वारा स्थापित उत्तरवाहिनी पाठ शालायां विशिष्ट

विद्वज्जनात् व्याकरणम् एवं न्यायशास्त्रस्य प्राचीन नवीन सिद्धान्तनुसारेण अध्ययनं कृतवान्। अनन्तरं जम्मौ श्री रघुनाथ विद्यालयात् न्यायव्याकरणादनाम् अध्ययनानन्तरं लाहोर देशे अध्यापकवृत्यां व्यापृतः आसन्। विभिन्नेषु विद्यालयेषु अध्यापनवृत्यां सः न्यायशास्त्रस्य प्रमुखः पण्डितः एव। तर्कमुक्तावली नामक ग्रन्थः तेन विरचितः आसन्।

कृष्णदत्तशात्री -

जम्मुकाश्मीरे तार्किक पण्डितानां मध्ये कृष्णदत्तशास्त्र्याः नाम सदा विलसति स्म। सः काव्ये व्याकरणे न्याये च असाधारणपण्डितः आसीत्। तर्कप्रकाशः नामक लघुग्रन्थः तेन विरचितमासीत्।

महोमहोपाध्याय दुर्गाप्रसादः व्याकरण न्याय काव्यादि सर्वेषु शास्त्रेषु पण्डितः आसीत्।सः न्यायमञ्जरीप्रकाशः इति एकस्य प्रौढटीकायाः कर्ता अपि भवति।

श्रीरामप्रपन्न शास्त्री -

श्री रामप्रपन्नशास्त्री व्याकरण - न्याय - वैशेषिक - वेदान्त - मीमांसा - सांख्य - योग -धर्मशास्त्र तत्र तदन्यशास्त्रेषु च प्रकाण्डपण्डितः आसन्। न्यायशास्त्रे तस्य पाण्डित्यं निस्तुलमेव। एवं काश्मीरदेशीयाः सः अनुमितिगादाधर्याः परिष्करणमपि कृतवान्। एवं रीत्या रूपचन्द्रकविराजः साहेबराम्, श्री सीताराम, श्री गङ्गाधरशास्त्री, श्री विश्वनाथ शास्त्री इत्यादि अनेकाः काश्मीरदेशीयाः नैय्यायिकाः न्याय दर्शनस्य अभिवृद्धये प्रयत्नमकरोत्।

न केवलं न्यायशास्त्रे किन्तु काव्यालङ्कारव्याकरण मीमांसादि शास्त्रेष्वपि काश्मीरस्य महत्तरमेव। भरत, भामह, उद्भट, वामन, रुद्रट, आनन्दवर्धन, अभिनवगुप्त, कुन्तक, महिमभट्ट, क्षेमेन्द्र, मम्मट, रुय्यकादि अतिप्रशस्ताः काव्यशास्त्रप्रवर्तकाः काश्मीरदेशीयाः एव।

एवं काश्मीर शैवदर्शनस्य प्रमुखाचार्याः ग्रन्थकाराः कल्लट, सोमानन्द, उत्पल, राजानक, रामकण्ठकाश्मीरदेशीयाः एव। तथा अभिनन्दः , शिवस्वामी, क्षेमेन्द्र, सोमदेव, वासुदेव, जयद्रथादि दिग्गजकवीनां जन्मदेशोपि काश्मीर एव। एवं संस्कृतसाहित्ये काश्मीरस्य अंशदानं अतिविशिष्टम् अतिमहत्तरमेवेति प्रतिभाति।